श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ सङ्कीर्णस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ सङ्कीर्णस्तबकः ॥

समस्तगुणविस्तार समावेशनिवेशनम्।
वन्देऽरविन्दनिलयं वरदं परदैवतम्॥ १ ॥

औदार्यशेवधिरनिन्दित कान्तिसिन्धुः
ओजः प्रसादनिधिरुज्ज्वलसौकुमार्या।
वैदर्भरीतिरिव वारिधिराजकन्ये
श्लाघापदं भवसि सारविदां कवीनाम्॥ २ ॥

आरम्भमेत्य महनीय ममोघयत्ना
प्राप्त्याशया श्रितपदा परमेप्सितस्य।
नित्यं फलं कलयसे नियताप्तिभाजा
नाथेन नाटककलापरिपाटिकेव॥ ३ ॥

व्याप्त्या प्रसिद्धा श्रितपक्षपाता
बाधानभिज्ञा प्रतिपक्षशून्या।
समीहितं साधयसि ध्रुवं नः
सद्धेतुवद् दुग्धपयोधिकन्ये॥ ४ ॥

प्रकृतिरुचिरमूर्तिः प्रत्ययानां विधात्री
समधिकगुणवृद्धिः साधुतामादधाना।
सृजति पदमजाद्यैरीप्सितां द्रागनन्त-
स्थिरफणितिविधेया शब्दविद्येव पद्मे॥ ५ ॥

अधिकरण विचारारम्भसीदद्विपक्षं
किमपि विशदयन्त्या कृत्स्नवेदार्थतत्त्वम्।
गलति गहनकर्मालम्बनं मोहजालं
कमलमुखि भवत्या कर्ममीमांसयेव॥ ६ ॥

चतुराकृतिलक्षणाभिरामा
परदेवस्य गुणान् प्रकाशयन्ती।
उपदर्शयसेऽपवर्गमार्गं
मम शारीरकभारतीव मातः॥ ७॥

सुवर्णश्रीरम्यं शुभकरपदचं श्रुतिकुलं
भवद्रूपं चेदं भवति महितं ब्राह्मणगणैः।
तयोरित्थं भेदः स्फुरति तटिनीजानितनये
बुधेन्द्रैरध्येयं प्रथममितरद् ध्येयमिति च॥ ८॥

व्याकोचवारिजधरां द्विजराजसेव्याम्
अव्याहताममृतशैवलिनीमिव त्वाम्।
निःसीम संसृतिनिदाघ विदाहतप्ताः
केचित् सुधाब्धितनये कृतिनो भजन्ते॥ ९॥

वात्सल्यं तव राघवप्रणयिनि व्याचष्ट काकासुरः
शक्तिं दुर्घटसाधनीं हनुमतः शीतस्स वालानलः।
औदार्यं त्वदपाङ्गलब्ध विभवोल्लासा महेन्द्रादयः
कारुण्यं कृपणा वयं तु विगुणा निर्हेतुकं रक्षिताः॥ १०॥

दोषौघः शरणं जगाम गुणतामादित्सुरङ्गानि ते
कौटिल्यं किमपि भ्रुवौ कठिनता कल्याणि वक्षोरुहौ।
दारिद्र्यं बत मध्यभागमधरं रागस्तमः कुन्तलान्
चापल्यं दृशमम्ब मन्दगतिता पादौ च मौग्ध्यं मुखम्॥ ११॥

कृतस्त्वया देवि कृपाकटाक्ष-
लेशैरहं श्लोककृदर्भकोऽपि।
परं त्वहं श्लोककृदित्यभीक्ष्णं
कदा नु गायेयमिति प्रतीक्षे॥ १२॥

आगस्ततिं मे किमदृश्यविद्याम्
अध्यापयस्यब्धिसुते तथा त्वम्।



www.prapatti.com

स विश्वतश्चक्षुरधोक्षजोऽपि
    न पश्यति व्यक्ततमां यथैनाम्॥ १३॥

रक्षेति नाथसविधे तव गाढमुक्तिः
    यद्युद्गता मम भवेत्तत एव मुक्तिः।
एतावति श्रितमनोरथपूरणेऽस्मिन्
    कृष्णप्रिये ननु तथापि कियान् विचारः॥ १४॥

यद्युन्निनीषसि यदूद्वहवल्लभे मां
    कर्माणि कारय तदा कलुषोज्झितानि।
नैर्घृण्यमेषि यदि वा न ततोऽपि दूये
    नैराश्यमेव हि सुखं निगदन्ति सन्तः॥ १५॥

नैवापवर्गमति दुर्गममर्थयेऽहं
    न स्वर्गमम्ब न ततोऽप्यपरं च सौख्यम्।
अभ्यर्थये हरिसखि त्वयि भक्तिमात्रम्
    अत्रापि चिन्तयसि चेदथ किं करोमि॥ १६॥

मा कोपं कुरु मातरेकमधुना जल्पामि धृष्टो वचः
    शक्तिः कर्तुमकर्तुमन्यथयितुं जागर्ति येयं त्वयि।
तल्लेशो मम चेदसेत्स्यदमृतं सर्वाननेष्यं क्षणात्
    विद्मो नैवमुपेक्षसे घनकृपा कस्मात्त्वमस्मानिति॥ १७॥

सौन्दर्यस्य निधिर्मुदामुदयभूः संपत्तिमञ्जूषिका
    कान्तीनां निलयः कलाजलनिधिः क्षान्तेर्निशान्तस्थली।
दाक्षिण्यस्य शरण्यसद्म कमले दातृत्वविश्रान्तिभूः
    आस्थानी यशसां प्रपाऽसि सतृषामाद्यस्य पुंसो धनम्॥ १८॥

मोहोन्मूलनमूलिका भवजुषां मोक्षाध्व निश्रेणिका
    चेतः शुद्धिविधानसिद्धगुलिका चिन्तातमश्चन्द्रिका।
विद्याविभ्रमशालिकाऽसि कमले विष्णोरुरोमालिका
    मातस्त्वं मम पारिजातलतिका मोदाम्बुधेर्वीचिका॥ १९॥



www.prapatti.com

विकासः पुण्यानामपि च विकचाम्भोरुहरुचां
    विवर्तो हर्षाणां विततिरमृतानां परिणतिः।
विकारः कारुण्यामृत जलधिवीची परिषदां
    विकल्पः कल्पद्रोर्जननि तव वीक्षा विजयते॥ २०॥

प्रज्ञालतानां किमुपघ्नयष्टिः
    पनायतां कामगवी कवीनाम्।
प्रपञ्चमातस्त्वमकिञ्चनानां
    प्राणप्रतिष्ठा परमाऽसि काष्ठा॥ २१॥

अस्मादृशामभ्युदयाङ्कुरो वा
    नाथस्य पद्मे नयनोत्सवो वा।
दिव्यौषधं वा दुरितामयानां
    पारं परं वा भवती भवाब्धेः॥ २२॥

ताटङ्करक्षां त्रिदशाङ्गनानां
    तरङ्गिणीजानितपः फलं श्रीः।
दारिद्र्यविद्रावणमूलविद्यां
    जगुर्जगन्नायकनायिकां त्वाम्॥ २३॥

परिष्कृतिं पङ्कजकाननानां
    परायणं नः शरणागतानाम्।
सन्तः शकुन्तध्वजसुन्दरि त्वां
    सर्वस्वमाहुः सकलागमानाम्॥ २४॥

परिकर्म विनिर्मलं मुरारेः
    प्रतियत्नं प्रतिबुद्धशेमुषीणाम्।
भवतीं भवतीक्ष्णयातनानां
    अभिचाराहुतिमाहुरब्धिकन्ये॥ २५॥

मुनिमानस राजहंसिका वा
    मुरभित्कल्पक मञ्जुमञ्जरी वा।



www.prapatti.com

श्रुतिपञ्जरदिव्यशारिका वा
जननि त्वं गुणरत्नपेटिका वा॥ २६ ॥

प्रतिसृष्टिरियं तडिल्लतानां
परिणामो नु शिरीषमञ्जरीणाम्।
प्रतिभाति हृदि त्वदीयमूर्तिः
परिवृत्तिर्हरिपत्नि काञ्चनानाम्॥ २७ ॥

प्रस्तावना भुवनपालन नाटकस्य
प्राच्या दिशो धवलिमा भवकालरात्रेः।
दुर्गर्व सर्वरजनीचर धूमकेतुः
दोषद्रुमस्य परशुस्तव देवि रूपम्॥ २८ ॥

आलानयष्टिरसि योगिमनोगजानाम्
आशापिशाच परिमोचन यन्त्रविद्या।
कार्तान्तलोक गमन प्रतिरोधमुद्रा
कारुण्यपुण्यतटिनी कमलालये त्वम्॥ २९ ॥

शरदं तमोघनानां
शाश्वतसुखसम्पदामुपोद्घातम्।
शरणं व्रजामि कमले
शौरिवशीकार मूलिकां भवतीम्॥ ३० ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे सङ्कीर्णस्तबकः ॥

www.prapatti.com